# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ३०

जिते महेन्द्रेऽतिबले रावणस्य सुतेन वै ।
प्रजापतिं पुरस्कृत्य गत्वा लङ्कां सुरास्तदा ॥ १ ॥

तं रावणं समासाद्य पुत्रभ्रातृभिरावृतम् ।
अब्रवीद्गगने तिष्ठन्सान्त्वपूर्वं प्रजापतिः ॥ २ ॥

वत्स रावण तुष्टोऽस्मि तव पुत्रस्य संयुगे ।
अहोऽस्य विक्रमौदार्यं तव तुल्योऽधिकोऽपि वा ॥ ३ ॥

जितं हि भवता सरं त्रैलोक्यं स्वेन तेजसा ।
कृता प्रतिज्ञा सफला प्रीतोऽस्मि स्वसुतेन वै ॥ ४ ॥

अयं च पुत्रोऽतिबलस्तव रावणरावणिः ।
इन्द्रजित्त्विति विख्यातो जगत्येष भविष्यति ॥ ५ ॥

बलवाञ्शत्रुनिर्जेता भविष्यत्येष राक्षसः ।
यमाश्रित्य त्वया राजन्स्थापितास्त्रिदशा वशे ॥ ६ ॥

तन्मुच्यतां महाबाहो महेन्द्रः पाकशासनः ।
किं चास्य मोक्षणार्थाय प्रयच्छन्ति दिवौकसः ॥ ७ ॥

अथाब्रवीन्महातेजा इन्द्रजित्समितिञ्जयः ।
अमरत्वमहं देव वृणोमीहास्य मोक्षणे ॥ ८ ॥

अब्रवीत्तु तदा देवो रावणिं कमलोद्भवः ।
नास्ति सर्वामरत्वं हि केषां चित्प्राणिनां भुवि ॥ ९ ॥

अथाब्रवीत्स तत्रस्थमिन्द्रजित्पद्मसम्भवम् ।
श्रूयतां या भवेत्सिद्धिः शतक्रतुविमोक्षणे ॥ १० ॥

ममेष्टं नित्यशो देव हव्यैः सम्पूज्य पावकः ।
सङ्ग्राममवतर्तुं वै शत्रुनिर्जयकाङ्क्षिणः ॥ ११ ॥

तस्मिंश्चेदसमाप्ते तु जप्यहोमे विभावसोः ।
युध्येयं देवं सङ्ग्रामे तदा मे स्याद्विनाशनम् ॥ १२ ॥

सर्वो हि तपसा चैव वृणोत्यमरतां पुमान् ।
विक्रमेण मया त्वेतदमरत्वं प्रवर्तितम् ॥ १३ ॥

एवमस्त्विति तं प्राह वाक्यं देवः प्रजापतिः ।
मुक्तश्चेन्द्रवितो शक्रो गताश्च त्रिदिवं सुराः ॥ १४ ॥

एतस्मिन्नन्तरे शक्रो दीनो भ्रष्टाम्बरस्रजः ।
राम चिन्तापरीतात्मा ध्यानतत्परतां गतः ॥ १५ ॥

तं तु दृष्ट्वा तथाभूतं प्राह देवः प्रजापतिः ।
शक्रक्रतो किमुत्कण्ठां करोषि स्मर दुष्कृतम् ॥ १६ ॥

अमरेन्द्र मया बह्व्यः प्रजाः सृष्टाः पुरा प्रभो ।
एकवर्णाः समाभाषा एकरूपाश्च सर्वशः ॥ १७ ॥

तासां नास्ति विशेषो हि दर्शने लक्षणेऽपि वा ।
ततोऽहमेकाग्रमनास्ताः प्रजाः पर्यचिन्तयम् ॥ १८ ॥

सोऽहं तासां विशेषार्थं स्त्रियमेकां विनिर्ममे ।
यद्यत्प्रजानां प्रत्यङ्गं विशिष्टं तत्तदुद्धृतम् ॥ १९ ॥

ततो मया रूपगुणैरहल्या स्त्री विनिर्मिता ।
अहल्येत्येव च मया तस्या नाम प्रवर्तितम् ॥ २० ॥

निर्मितायां तु देवेन्द्र तस्यां नार्यां सुरर्षभ ।
भविष्यतीति कस्यैषा मम चिन्ता ततोऽभवत् ॥ २१ ॥

त्वं तु शक्र तदा नारीं जानीषे मनसा प्रभो ।
स्थानाधिकतया पत्नी ममैषेति पुरन्दर ॥ २२ ॥

सा मया न्यासभूता तु गौतमस्य महात्मनः ।
न्यस्ता बहूनि वर्षाणि तेन निर्यातिता च सा ॥ २३ ॥

ततस्तस्य परिज्ञाय मया स्थैर्यं महामुनेः ।
ज्ञात्वा तपसि सिद्धिं च पत्न्यर्थं स्पर्शिता तदा ॥ २४ ॥

स तया सह धर्मात्मा रमते स्म महामुनिः ।
आसन्निराशा देवास्तु गौतमे दत्तया तया ॥ २५ ॥

त्वं क्रुद्धस्त्विह कामात्मा गत्वा तस्याश्रमं मुनेः ।

दृष्टवांश्च तदा तां स्त्रीं दीप्तामग्निशिखाम् इव ॥ २६॥

सा त्वया धर्षिता शक्र कामार्तेन समन्युना ।
दृष्टस्त्वं च तदा तेन आश्रमे परमर्षिणा ॥ २७॥

ततः क्रुद्धेन तेनासि शप्तः परमतेजसा ।
गतोऽसि येन देवेन्द्र दशाभागविपर्ययम् ॥ २८॥

यस्मान्मे धर्षिता पत्नी त्वया वासव निर्भयम् ।
तस्मात्त्वं समरे राजञ्शत्रुहस्तं गमिष्यसि ॥ २९॥

अयं तु भावो दुर्बुद्धे यस्त्वयेह प्रवर्तितः ।
मानुषेष्वपि सर्वेषु भविष्यति न संशयः ॥ ३०॥

तत्राधर्मः सुबलवान्समुत्थास्यति यो महान् ।
तत्रार्धं तस्य यः कर्ता त्वय्यर्धं निपतिष्यति ॥ ३१॥

न च ते स्थावरं स्थानं भविष्यति पुरन्दर ।
एतेनाधर्मयोगेन यस्त्वयेह प्रवर्तितः ॥ ३२॥

यश्च यश्च सुरेन्द्रः स्याद्ध्रुवः स न भविष्यति ।
एष शापो मया मुक्त इत्यसौ त्वां तदाब्रवीत् ॥ ३३॥

तां तु भार्यां विनिर्भर्त्स्य सोऽब्रवीत्सुमहातपाः ।
दुर्विनीते विनिध्वंस ममाश्रमसमीपतः ॥ ३४॥

रूपयौवनसम्पन्ना यस्मात्त्वमनवस्थिता ।
तस्माद्रूपवती लोके न त्वमेका भविष्यसि ॥ ३५॥

रूपं च तत्प्रजाः सर्वा गमिष्यन्ति सुदुर्लभम् ।
यत्तवेदं समाश्रित्य विभ्रमेऽयमुपस्थितः ॥ ३६॥

तदा प्रभृति भूयिष्ठं प्रजा रूपसमन्विताः ।
शापोत्सर्गाद्धि तस्येदं मुनेः सर्वमुपागतम् ॥ ३७॥

तत्स्मर त्वं महाबाहो दुष्कृतं यत्त्वया कृतम् ।
येन त्वं ग्रहणं शत्रोर्गतो नान्येन वासव ॥ ३८॥

शीघ्रं यजस्व यज्ञं त्वं वैष्णवं सुसमाहितः ।
पावितस्तेन यज्ञेन यास्यसि त्रिदिवं ततः ॥ ३९॥

पुत्रश्च तव देवेन्द्र न विनष्टो महारणे ।
नीतः संनिहितश्चैव अर्यकेण महोदधौ ॥ ४०॥

एतच्छ्रुत्वा महेन्द्रस्तु यज्ञमिष्ट्वा च वैष्णवीम् ।
पुनस्त्रिदिवमाक्रामदन्वशासच्च देवताः ॥ ४१॥

एतदिन्द्रजितो राम बलं यत्कीर्तितं मया ।
निर्जितस्तेन देवेन्द्रः प्राणिनोऽन्ये च किं पुनः ॥ ४२॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com